श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

# ॥ पवनसुत पञ्चरत्नम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पवनसुत पञ्चरत्नम् ॥

यत्र यत्र रघुनाथकीर्तनं
    तत्र तत्र कृतमस्तकाञ्जलिम्।
बाष्पवारिपरिपूर्णलोचनं
    मारुतिं नमत राक्षसान्तकम्॥

वीताखिलविषयेच्छं
    जातानन्दाश्रुपुलकमत्यच्छम्।
सीतापतिदूताद्यं
    वातात्मजमद्य भावये हृद्यम्॥ 1 ॥

तरुणारुणमुखकमलम्
    करुणारसपूरपूरितापाङ्गम्।
सञ्जीवनमाशासे
    मञ्जुलमहिमानमञ्जनाभाग्यम्॥ 2 ॥

शम्बरवैरिशरातिगं
    अम्बुजदलविपुललोचनोदारम्।
कम्बुगलमनिलदिष्टं
    बिम्बज्वलितोष्ठमेकमवलम्बे॥ 3 ॥

दूरीकृतसीतार्तिः
    प्रकटीकृतरामवैभवस्फूर्तिः।
दारितदशमुखकीर्तिः
    पुरतो मम भातु हनुमतोमूर्तिः॥ 4 ॥

वानरनिकराध्यक्षं
    दानवकुलकुमुद रविकर सदृक्षम्।
दीनजनावनदीक्षं
    पवनतपःपाकपुञ्जमद्राक्षम्॥ 5॥

एतत्पवनसुतस्य स्तोत्रं
    यः पठति पञ्चरत्नाख्यम्।
चिरमिह निखिलान्भोगान्
    भुक्त्वा श्रीरामभक्तिभाग्भवति॥ 6॥

॥ इति पवनसुत पञ्चरत्नं समाप्तम्॥